# ॥ श्री सूर्यनारायण पूजा॥
मकर संक्रान्ति पूजा

This puujaa is performed on January 14 of every gregorian year.
(when the sun comes to capricornus))

1 At the regular Altar

ॐ सर्वेभ्यो गुरुभ्यो नमः ।
ॐ सर्वेभ्यो देवेभ्यो नमः ।
ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः ॥
प्रारंभ कार्यं निर्विघ्नमस्तु । शुभं शोभनमस्तु ।
इष्ट देवता कुलदेवता सुप्रसन्ना वरदा भवतु ॥
अनुज्ञां देहि ॥

---

At Shrii suuryanaaraayaNa Altar
२ आचमनः

ॐ केशवाय स्वाहा । ॐ नारायणाय स्वाहा ।
ॐ माधवाय स्वाहा ।

ॐ गोविंदाय नमः । ॐ विष्णवे नमः ।
ॐ मधुसूदनाय नमः । ॐ त्रिविक्रमाय नमः ।
ॐ वामनाय नमः । ॐ श्रीधराय नमः ।
ॐ हृषीकेशाय नमः । ॐ पद्मनाभाय नमः ।
ॐ दामोदराय नमः । ॐ सङ्कर्षणाय नमः ।
ॐ वासुदेवाय नमः । ॐ प्रद्युम्नाय नमः ।
ॐ अनिरुद्धाय नमः । ॐ पुरुषोत्तमाय नमः ।
ॐ अधोक्षजाय नमः । ॐ नारसिंहाय नमः ।
ॐ अच्युताय नमः । ॐ जनार्दनाय नमः ।
ॐ उपेंद्राय नमः । ॐ हरये नमः ।
श्री कृष्णाय नमः ॥

---

३ प्राणायामः

ॐ प्रणवस्य परब्रह्म ऋषिः । परमात्मा देवता ।
दैवी गायत्री छन्दः । प्राणायामे विनियोगः ॥

ॐ भूः । ॐ भुवः । ॐ स्वः । ॐ महः ।
ॐ जनः । ॐ तपः । ॐ सत्यम् ।
ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमही
धियो यो नः प्रचोदयात् ॥
(Repeat aachamana )
ॐ आपोज्योति रसोमृतं ब्रह्म भूर्भुवस्सुवरोम् ॥

---

४ सङ्कल्पः

ॐ श्रीमान् महागणाधिपतये नमः ।

श्री गुरुभ्यो नमः । श्री सरस्वत्यै नमः ।
श्री वेदाय नमः । श्री वेदपुरुषाय नमः ।
इष्टदेवताभ्यो नमः । कुलदेवताभ्यो नमः ।
स्थानदेवताभ्यो नमः । ग्रामदेवताभ्यो नमः ।
वास्तुदेवताभ्यो नमः । शचीपुरंदराभ्यां नमः ।
उमामहेश्वराभ्यां नमः । मातापितृभ्यां नमः ।
लक्ष्मीनारायणाभ्यां नमः ।

सर्वेभ्यो देवेभ्यो नमो नमः ।
सर्वेभ्यो ब्राह्मणेभ्यो नमो नमः ।
येतद्कर्मप्रधान देवताभ्यो नमो नमः ॥

॥ अविघ्नमस्तु ॥

सुमुखश्च एकदंतश्च कपिलो गजकर्णकः ।
लंबोदरश्च विकटो विघ्ननाशो गणाधिपः ॥
धूम्रकेतुर्गणाध्यक्षो बालचन्द्रो गजाननः ।
द्वादशैतानि नामानि यः पठेत् श्रुणुयादपि ॥
विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा ।
संग्रामे सङ्कटेश्चैव विघ्नः तस्य न जायते ॥

शुक्लांबरधरं देवं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्व विघ्नोपशांतये ॥

सर्वमङ्गल माङ्गल्ये शिवे सर्वार्थ साधिके ।
शरण्ये त्र्यंबके देवी नारायणी नमोऽस्तुते ॥

सर्वदा सर्व कार्येषु नास्ति तेषां अमङ्गलम् ।
येषां हृदिस्थो भगवान् मङ्गलायतनो हरिः ॥

तदेव लग्नं सुदिनं तदेव ताराबलं चंद्रबलं तदेव ।
विद्या बलं दैवबलं तदेव भास्करं तेंघ्रिऽयुगं स्मरामि ॥

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ।
येषां इन्दीवर श्यामो हृदयस्थो जनार्दनः ॥

विनायकं गुरुं भानुं ब्रह्माविष्णुमहेश्वरान् ।
सरस्वतीं प्रणम्यादौ सर्व कार्यार्थ सिद्धये ॥

श्रीमद् भगवतो महापुरुषस्य विष्णोराज्ञाय प्रवर्तमानस्य
अद्य ब्रह्मणोऽद्वितीय परार्धे विष्णुपदे श्री श्वेतवराह कल्पे
वैवस्वत मन्वन्तरे भारत वर्षे भरत खंडे जंबूद्वीपे
दण्डकारण्य देशे गोदावर्या दक्षिणे तीरे कृष्णवेण्यो उत्तरे
तीरे परशुराम क्षेत्रे (सम्युक्त अमेरिका देशे or
Australia देशे Victoria ग्रामे बहरीनु देशे) शालिवाहन
शके वर्तमाने व्यवहारिके ईश्वर नाम संवत्सरे उत्तरायणे
हेमन्त ऋतौ पुष्य मासे कृष्ण पक्षे द्वितीयाम् तिथौ आश्लेषा
नक्षत्रे बुध वासरे सर्व ग्रहेषु यथा राशि स्थान स्थितेषु सत्सु
येवं गुणविशेषेण विशिष्टायां शुभपुण्यतिथौ मम आत्मन
श्रुतिस्मृतिपुराणोक्त फलप्राप्यर्थं मम सकुटुम्बस्य
क्षेम स्थैर्य आयुरारोग्य चतुर्विध पुरुषार्थ सिध्यर्थं
अंगीकृत श्री सूर्यनारायण व्रतांगत्वेन संपादित
सामग्रय्य श्रीगणेश वरुण ब्रह्म सूर्यादि नवग्रह इंद्रादि
अष्टलोकपाल गणपति चतुष्ट देवता पूजनपूर्वकं
श्री सूर्यनारायण प्रीत्यर्थं यथा शक्त्या यथा
मिलितोपचार द्रव्यैः पुरुषसूक्त श्रीसूक्त विष्णुसूक्त
पुराणोक्त मन्त्रैश्च ध्यानावाहनादि षोडशोपचारे
श्री सूर्यनारायण पूजनं करिष्ये ॥

इदं फलं मयादेव स्थापितं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेत् जन्मनिजन्मनि॥
(keep fruits in front of the Lord)

---

५ षडङ्ग न्यास
(touching various parts of the body)

ॐ यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू कावूरू पादावुच्येते ॥
अंगुष्ठाभ्यायां नमः । (touch the thumbs)
हृदयाय नमः ॥

ॐ ब्राह्मणोस्य मुखमासीत् बाहू राजन्यः कृतः ।
उरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥
तर्जनीभ्यां नमः । (touch both fore fingers)
शिरसे स्वाहा ॥

ॐ चंद्रमा मनसो जातः चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ॥
मध्यमाभ्यां नमः । (touch middle fingers)
शिखायै वौषट् ॥

नाभ्या आसीदन्तरिक्षम् शीर्ष्णो द्यौः समवर्तत ।
पदभ्यां भूमिर्दिशः श्रोत्रात् तथा लोकांग अकल्पयन् ॥
अनामिकाभ्यां नमः । (touch ring fingers)
कवचाय हुम् ॥

सप्ता!स्यासन् परिधा!यस् त्रि!ः सप्त! समि!धः कृ!ता!ः ।
देवा! य!द् यज्ञ! तन्वाना! अ!बध्नन् पु!रुषम् पशु!म् ॥
कनिष्ठिकाभ्यां नमः । (touch little fingers)
नेत्रत्रयाय वौषट् ॥

यज्ञेन यज्ञमयजन्त देवाः तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्ते यत्र पूर्वे साध्याः सन्ति देवाः ॥
करतलकरपृष्ठाभ्यायां नमः । अस्त्राय फट् ॥
(snap fingers circle head clockwise and clap hands)

---

६ दिग्बन्धन
( show mudras)

ॐ सूर्यनारायणे इति दिग्बन्धः । दिशो बद्नामि ॥

---

७ गणपति पूजा

आदौ निर्विघ्नतासिध्यर्थं महा गणपतिं पूजनं करिष्ये ।
ॐ गणानां त्वा शौनको गृत्समदो गणपतिर्जगति
गणपत्यावाहने विनियोगः ॥
(pour water)

ॐ गणानां त्वा गणपतिं आवामहे ।
कविं कविनामुपम श्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत ।
आनः शृण्वन्नूतिभिः सीदसादनम् ॥

भूः गणपतिं आवाहयामि ।
भुवः गणपतिं आवाहयामि ।
स्वः गणपतिं आवाहयामि ।
ॐ भूर्भुवस्वः महागणपतये नमः ।
ध्यायामि । ध्यानं समर्पयामि ।

ॐ महागणपतये नमः । आवाहनं समर्पयामि ।
ॐ महागणपतये नमः । आसनं समर्पयामि ।
ॐ महागणपतये नमः । पाद्यं समर्पयामि ।
ॐ महागणपतये नमः । अर्घ्यं समर्पयामि ।
ॐ महागणपतये नमः । आचमनीयं समर्पयामि ।
ॐ महागणपतये नमः । स्नानं समर्पयामि ।
ॐ महागणपतये नमः । वस्त्रं समर्पयामि ।
ॐ महागणपतये नमः । यज्ञोपवीतं समर्पयामि ।
ॐ महागणपतये नमः । चंदनं समर्पयामि ।
ॐ महागणपतये नमः । परिमल द्रव्यं समर्पयामि ।

ॐ महागणपतये नमः । पुष्पाणि समर्पयामि ।
ॐ महागणपतये नमः । धूपं समर्पयामि ।
ॐ महागणपतये नमः । दीपं समर्पयामि ।
ॐ महागणपतये नमः । नैवेद्यं समर्पयामि ।
ॐ महागणपतये नमः । ताम्बूलं समर्पयामि ।
ॐ महागणपतये नमः । फलं समर्पयामि ।
ॐ महागणपतये नमः । दक्षिणां समर्पयामि ।
ॐ महागणपतये नमः । आर्तिक्यं समर्पयामि ।

ॐ भूर्भुवस्वः महागणपतये नमः ।
मन्त्रपुष्पं समर्पयामि ।
ॐ भूर्भुवस्वः महागणपतये नमः ।
प्रदक्षिणा नमस्कारान् समर्पयामि ।
ॐ भूर्भुवस्वः महागणपतये नमः ।
छत्रं समर्पयामि ।

ॐ महागणपतये नमः । चामरं समर्पयामि ।
ॐ महागणपतये नमः । गीतं समर्पयामि ।
ॐ महागणपतये नमः । नृत्यं समर्पयामि ।
ॐ महागणपतये नमः । वाद्यं समर्पयामि ।
ॐ महागणपतये नमः । सर्व राजोपचारान् समर्पयामि ॥

॥ अथ प्रार्थना ॥
ॐ वक्रतुण्ड महाकाय कोटि सूर्य समप्रभ ।
निर्विघ्नं कुरु मे देव सर्व कार्येषु सर्वदा ॥
ॐ भूर्भुवस्वः महागणपतये नमः । प्रार्थनां समर्पयामि ।

अनया पूजया विघ्नहर्ता महागणपति प्रियताम् ॥

---

८ दीप स्थापना

अथ देवस्य वाम भागे दीप स्थापनं करिष्ये ।
अग्निनाग्नि समिध्यते कविर्ग्रहपतिर्युवा हव्यवात् जुवास्यः ॥
(light the lamps)

---

९ भूमि प्रार्थना

महिद्यौ पृथ्वीचन इमं यज्ञं मिमिक्षतां
पिप्रतान्नो भरीमभिः ॥

---

१० धान्य राशि

ॐ औषधाय संवदंते सोमेन सहराज्ञ ।
यस्मै कृणेति ब्राह्मणस्थं राजन् पारयामसि ॥
(Touch the grains/rice/wheat)

---

११ कलश स्थापना

ॐ आ कलशेषु धावति पवित्रे परिसिंच्यते
उक्तैर्यज्ञेषु वर्धते ॥
(keep kalasha on top of rice pile)
ॐ इमं मे गङ्गे यमुने सरस्वती शुतुद्रिस्तोमं सचता परुष्ण्य ।
असिक्न्य मरुद्वृधे वितस्थयार्जीकीये श्रुणुह्या सुषोमय ॥
(fill kalasha with water)
ॐ गंधद्वारां धुरादर्शां नित्य पुष्पां करीषिणीम् ।
ईश्वरीं सर्व भूतानां तामि होपह्वयेश्रियम् ॥
(sprinkle in/apply ga.ndha to kalasha)
ॐ या फलिनीर्या अफला अपुष्पायाश्च पुष्पाणि ।
बृहस्पति प्रसोतास्थानो मञ्चत्वं हसः ॥
(put beetle nut in kalasha)
ॐ सहिरत्नानि दाशुषेसुवाति सविता भगः ।
तंभागं चित्रमीमहे ॥
(put jewels / washed coin in kalasha)
ॐ हिरण्यरूपः हिरण्य सन्द्रिग्पान्न पात्स्येदु हिरण्य वर्णः ।
हिरण्ययात्परियोनेर्निषद्या हिरण्यदाददत्थ्यन्नमस्मै ॥
(put gold / dakShina in kalasha)
ॐ कान्डात् कान्डात् परोहंति परुषः परुषः परि एवानो दूर्वे
प्रतनु सहस्रेण शतेन च ॥
(put duurva / karika )
ॐ अश्वत्थेवो निशदनं पर्णेवो वसतिश्कृत ।
गो भाज इत्किला सथयत्स नवथ पूरुषम् ॥
(put five leaves in kalasha)
ॐ युवासुवासः परीवीतागात् स उश्रेयान् भवति जायमानः ।
तं धीरासः कावयः उन्नयंति स्वाद्ध्यो स्वाद्ध्यो मनसा देवयंतः॥
(tie cloth for kalasha)
ॐ पूर्णादर्वि परापत सुपूर्णा पुनरापठ ।
वस्नेव विक्रीणावः इषमूर्जं शतकृतो ॥
(copper plate and aShTadala with ku.nkuM)

इति कलशं प्रतिष्ठापयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

---

११ वरुण पूजन
On the second kalasha)

तत्वायामि शुनः शेपोः वरुण त्रिष्टुप् कलशे
वरुणावाहने विनियोगः ॥

ॐ तत्वायामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः ।
आहेलमानो वरुणः बोध्युरुशं समान आयुः प्रमोषिः ॥

ॐ भूर्भुवःस्वः वरुणाय नमः । चंदनं समर्पयामि ॥

(add to kalasha)
ॐ भूर्भुवःस्वः । वरुणाय नमः । अक्षतान् समर्पयामि ॥
(add to kalasha)
ॐ भूर्भुवःस्वः । वरुणाय नमः । हरिद्रा कुंकुमं समर्पयामि ॥
ॐ भूर्भुवःस्वः । वरुणाय नमः । धूपं समर्पयामि ॥
ॐ भूर्भुवःस्वः । वरुणाय नमः । दीपं समर्पयामि ॥
ॐ भूर्भुवःस्वः । वरुणाय नमः । नैवेद्यं समर्पयामि ॥
ॐ भूर्भुवःस्वः । वरुणाय नमः ।
सकल राजोपचारार्थे अक्षतान् समर्पयामि ॥

अवते हेळो वरुण नमोभिरिव यज्ञेभिरीमहे हविर्भिः ।
क्षयं नमस्मभ्यं सुरप्रचेता राजन्नेनाम्सि शिश्रथः कृतानि ॥
वरुणाय नमः । मन्त्र पुष्पं समर्पयामि ॥
प्रदक्षिणा नमस्कारान् समर्पयामि ॥

अनया पूजया भगवान् श्री महा वरुण प्रियताम् ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

---

१२ कलश पूजन
(continue with second kalasha)

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले तत्र स्थितो ब्रह्म मध्ये मातृगणाः स्मृताः ॥
कुक्षौतु सागराः सर्वे सप्त द्वीपा वसुंधराः ।
ऋग्वेदोथ यजुर्वेदः सामवेदोह्यथर्वणः ॥
अंगैश्च सहिताः सर्वे कलशंतु समाश्रिताः ।
अत्र गायत्री सावित्री शांति पुष्टिकरी तथा ॥

आयान्तु देव पूजार्थं अभिषेकार्थ सिद्धये ॥

ॐ सितासिते सरिते यत्र संगधे तत्राप्लुतासो दिवमुत्पतंति ।
ये वैतन्वं विस्रजन्ति धीरास्ते जनासो अमृतत्त्वं भजन्ति ॥

॥ कलशः प्रार्थनाः ॥

कलशः कीर्तिमायुष्यं प्रज्ञां मेधां श्रियं बलम् ।
योग्यतां पापहानिं च पुण्यं वृद्धिं च साधयेत् ॥
सर्व तीर्थमयो यस्मात् सर्व देवमयो यतः ।
अथः हरिप्रियोसि त्वं पूर्णकुंभं नमोऽस्तुते ॥

कलशदेवताभ्यो नमः ।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

॥ मुद्रा ॥
(Show mudras as you chant )

निर्वीषि करणार्थे तार्क्ष मुद्रा ।
अमृति करणार्थे धेनु मुद्रा ।
पवित्री करणार्थे शङ्ख मुद्रा ।
संरक्षणार्थे चक्र मुद्रा ।
विपुलमाया करणार्थे मेरु मुद्रा ।

---

१३ शङ्ख पूजन
(pour water from kalasha to sha.nkha
add ga.ndha flower)

शङ्खं चंद्रार्क दैवतं मध्ये वरुण देवताम् ।
पृष्ठे प्रजापतिं विंद्याद् अग्रे गंगा सरस्वतीम् ॥
त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे ।
नमितः सर्व देवैश्च पाञ्चजन्यं नमोऽस्तुते ॥

पाञ्चजन्याय विद्महे । पावमानाय धीमहि ।
तन्नो शङ्खः प्रचोदयात् ॥

शङ्ख देवताभ्यो नमः ।
सकल पूजार्थे अक्षतान् समर्पयामि॥

---

१४ घंटार्चना
(Pour drops of water from sha.nkha on top of the bell
apply ga.ndha flower)

आगमार्थन्तु देवानां गमनार्थन्तु राक्षसाम् ।
कुरु घंटारवं तत्र देवतावाहन लांछनम् ॥
ज्ञानथोऽज्ञानतोवापि कांस्य घंटान् नवादयेत् ।
राक्षसानां पिशाचानां तद्देशे वसतिर्भवेत् ।
तस्मात् सर्व प्रयत्नेन घंटानादं प्रकारयेत् ।

घंटा देवताभ्यो नमः ।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

(Ring the gha.nTaa)

---

१५ आत्मशुद्धि
( Sprinkle water from sha.nkha
on puja items and devotees)

अपवित्रो पवित्रो वा सर्व अवस्थांगतोपि वा ।
यः स्मरेत् पुंडरीकाक्षं सः बाह्याभ्यंतरः शुचिः ॥

---

१६ नवग्रह अष्ट एवं चतुर्दल देवता पूजन

॥ नवग्रह देवता पूजन ॥

(begin at east go clockwise)

आकृष्णेनाङ्गीरसो हिरण्यस्तुपः सविता त्रिष्टुप्
सूर्यावाहने विनियोगः ॥
हिरण्ययेन सवितारतैन् देवो याति भुवनानि पश्यन् ॥
सूर्याय नमः । सूर्यं आवाहयामि ॥

आप्यायस्वेति गौतमः सोमो गायत्रि
चंद्रावाहने विनियोगः ॥
ॐ आप्यायस्वसमेतुते विश्वतः सोमवृष्णम्
भवा वाजस्य संघदे
चंद्राय नमः । चन्द्रं आवाहयामि ॥

अग्नि मूर्द्ध विरूपाङ्गारको गायत्रि
अङ्गारकावाहने विनियोगः ॥
ॐ अग्निमूर्धादिवः ककुत्पतिः पृथिव्या अयम् ।
आपाम्रेताम्सि जिंवति
अङ्गारकाय नमः । अङ्गारकं आवाहयामि ॥

उद्बुद्दद्वं सौम्यो बुधः त्रिष्टुप्
बुधावाहने विनियोगः ॥
ॐ उद्बुद्यद्वं समनसः सखायाः
समग्नि विंद्वं बहवः सनीलः
दधिक्रामग्नि मशसञ्च देवीमिंद्रावतो
वसनिह्वयेवः
बुधाय नमः । बुधं आवाहयामि ॥

बृहस्पते घृत्समधो बृहस्पति त्रिष्टुप्
बृहस्पत्यावाहने विनियोगः ॥
ॐ बृहस्पते अति यदर्यो अर्हाद्युमद्विभाति क्रतुमज्जनेष ।
यद्दीदयच्छ्वस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् ॥
बृहस्पतये नमः । बृहस्पतिं आवाहयामि ॥

शुक्रांते भारद्वाजः शुक्रः त्रिष्टुप्
शुक्रावाहने विनियोगः ॥
ॐ शुक्रांते अन्यद्य जतन्ते अन्यद्विशुरुषे अहनि दौरिवासि
विश्वहिमाया अवसि स्वाध्वो भद्रते पूशन्निहिरातिरस्तु
शुक्राय नमः । शुक्रं आवाहयामि ॥

शमग्निरिरिंबिरः शनैश्चर उष्णिक्
शन्यावाहने विनियोगः ॥
ॐ शमग्निराग्निभिः करश्चन्न तपतु सूर्यः
शमवातो वात्वरपा अपसृधः
शनैश्चराय नमः । शनैश्चरं आवाहयामि ॥

कयानो वामदेवो राहुर्गायत्रि राहु आवाहने विनियोगः ॥
ॐ कयानश्चित्र आभूवदूती सदावृधः सखा ।
कया शचिष्टयाऽवृता ॥
राहवे नमः । राहुं आवाहयामि ॥

केतुं कृण्वन् मधुश्चंदः केतुर्गायत्रि
केत्वावाहने विनियोगः ॥
ॐ केतुं कृण्वन् केतवे पेशो मर्य आपेशसे ।
समुषड्भिरजायथा ॥
केतवे नमः । केतुं आवाहयामि ॥

॥ अष्टदल देवता पूजन ॥

ॐ इंद्राय नमः । अग्नये नमः ।
यमाय नमः । नैऋतये नमः ।
वरुणाय नमः । वायवे नमः ।
कुबेराय नमः । ईशानाय नमः ।

॥ चतुर्दल देवता ॥

ॐ गणपतये नमः । ॐ दुर्गायै नमः ।
ॐ क्षेत्रपालाय नमः । ॐ वसोष्पतये नमः ।

रव्यादि नवग्रह अष्टदल चतुर्दलेषु स्थित सर्वदेवताभ्यो नमः ॥

ध्यायामि ध्यानं समर्पयामि ।
आवाहनं समर्पयामि ।
आसनं समर्पयामि ।
पाद्यं समर्पयामि ।
अर्घ्यं समर्पयामि ।
आचमनीयं समर्पयामि ।
स्नानं समर्पयामि ।
वस्त्रं समर्पयामि ।
यज्ञोपवीतं समर्पयामि ।
गंधं समर्पयामि ।
धूपं आघ्रापयामि ।
दीपं दर्शयामि ।
नैवेद्यं निवेदयामि ।
मन्त्रपुष्पं समर्पयामि ।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

यस्य स्मृत्या च नाम्नोक्त्या तपः पूजा क्रियादिषु ।
न्यूनं संपूर्णतां यादि सद्यो वन्दे तमच्युतम् ॥

अनया पूजया नवग्रहादि देवता प्रियताम् ॥

---

१७ षट् पात्र पूजा

( put tulasi leaves or akShatAs in empty vessels)

वायव्ये अर्घ्यम् ।
नैऋत्ये पाद्यम् ।
ईशान्ये आचमनीयम् ।
आग्नेये मधुपर्कम् ।
पूर्वे स्नानीयम् ।
पश्चिमे पुनराचमनम् ।

---

१८ पञ्चामृत पूजा
( put tulasi leaves or akShataas in vessels )

क्षीरे गोविन्दाय नमः । (keep milk in the centre)
दधिनि वामनाय नमः । (curd facing east )
घृते विष्णवे नमः । (Ghee to the south)
मधुनि मधुसूधनाय नमः । ( Honey to west )
शर्करायां अच्युताय नमः । ( Sugar to north)

---

१९ द्वारपालक पूजा

पूर्वद्वारे द्वारश्रियै नमः ।
जयाय नमः । विजयाय नमः ।
दक्षिणद्वारे द्वारश्रियै नमः ।
नंदाय नमः । सुनंदाय नमः ॥
पश्चिमद्वारे द्वारश्रियै नमः ।
बलाय नमः । प्रबलाय नमः ॥
उत्तरद्वारे द्वारश्रियै नमः ।
कुमुदाय नमः । कुमुदाक्षाय नमः ॥

मध्ये नवरत्नखचित दिव्यसिंहासनस्योपरि
श्री सूर्यनारायण स्वामिने नमः ॥
द्वारपालक पूजां समर्पयामि ॥

---

२० पीठ पूजा

पीठस्य अधोभागे आधार शक्त्यै नमः ॥ कूर्माय नमः ॥
दक्षिणे क्षीरोदधिये नमः । सिंहाय नमः ॥
सिंहासनस्य आग्नेय कोणे वराहाय नमः ॥
नैऋत्य कोणे ज्ञानाय नमः ॥
वायव्य कोणे वैराग्याय नमः ॥
ईशान्य कोणे ऐश्वर्याय नमः ॥
पूर्व दिशे धर्माय नमः ॥
दक्षिण दिशे ज्ञानाय नमः ॥
पश्चिम दिशे वैराग्याय नमः ॥
उत्तर दिशे अनैश्वराय नमः ॥
पीठ मध्ये मूलाय नमः ॥
नालाय नमः ॥
पत्रेभ्यो नमः ॥
केसरेभ्यो नमः ॥
कर्णिकायै नमः ॥
कर्णिका मध्ये सं सत्त्वाय नमः ॥
रं रजसे नमः ॥ तं तमसे नमः ॥

सूर्यमण्डलाय नमः ॥
सूर्यमण्डलाधिपतये ब्रह्मणे नमः ॥
सोममण्डलाय नमः ॥
सोममण्डलाधिपतये विष्णवे नमः ॥
वह्निमण्डलाय नमः ॥
वह्निमण्डलाधिपतये ईश्वराय नमः ॥

श्री सूर्यनारायणाय नमः । पीठ पूजां समर्पयामि ॥

---

२१ दिग्पालक पूजा
(Start from east of kalasha or deity)
इंद्राय नमः ॥
अग्नये नमः ॥
यमाय नमः ॥
नैऋतये नमः ॥
वरुणाय नमः ॥
वायव्ये नमः ॥
कुबेराय नमः ॥
ईशानाय नमः ॥

इति दिग्पालक पूजां समर्पयामि ॥

---

२२ प्राण प्रतिष्ठा
(hold flowers/akShata in hand)
ध्यायेत् सत्यम् गुणातीतं गुणत्रय समन्वितं
लोकनाथं त्रिलोकेशं कौस्तुभाभरणं हरिम् ।
नीलवर्णं पीतवासं श्रीवत्स पदभूषितं
गोकुलानन्दं ब्रह्माध्यैरपि पूजितम् ॥

(hold flowers/akShataa in hand)
ॐ अस्य श्री प्राण प्रतिष्ठापन महा मंत्रस्य
ब्रह्मा विष्णु महेश्वरा ऋषयः
ऋग्यजुर्सामाथर्वाणि छन्दांसि । प्राण शक्तिः ।
परा देवता । आं बीजं । ह्रीं शक्तिः । क्रों कीलकं ।

अस्यां मूर्तौ प्राण प्रतिष्ठा सिद्ध्यर्थे जपे विनियोगः ॥

॥ करन्यासः ॥

आं अंगुष्ठाभ्यां नमः ॥
ह्रीं तर्जनीभ्यां नमः ॥
क्रौं मध्यमाभ्यां नमः ॥
आं अनामिकाभ्यां नमः ॥
ह्रीं कनिष्ठिकाभ्यां नमः ॥
क्रौं करतलकरपृष्ठाभ्यां नमः ॥

॥ अङ्गन्यासः ॥

आं हृदयाय नमः ॥
ह्रीं शिरसे स्वाहा ॥
क्रौं शिखायै वौषट् ॥
आं कवचाय हुम् ॥
ह्रीं नेत्रत्रयायवौषट् ॥
क्रौं अस्त्राय फट् ॥

भुर्भुवस्वरोम् ॥

आं ह्रीं क्रौं क्रौं ह्रीं आं
य र ल व श ष स ह
ॐ अहं सः सोहं सोहं अहं सः ।

अस्यां मूर्ते प्राणः तिष्ठंतुः
अस्यां मूर्ते जीवः तिष्ठन्तु
अस्यां मूर्ते सर्वेन्द्रियाणि मनस्त्वत् चक्षुः
श्रोत्र जिह्वा घ्राणैः वाक्वाणि पादपायोपस्थानि
प्राण अपान व्यान उदान समान अत्रागत्य
सुखेन स्थिरं तिष्ठन्तु स्वाहा ।

असुनीते पुनरस्मासु चक्षुवः पुनः प्राणमिहीनो
देहिभोगं जोक्षश्येम सूर्यमुच्चरन्तु मनुमते
मृडयान स्वस्ति अमृतं वै प्राणा अमृतमापः प्राणानेव
यथा स्थानं उपह्वयेत् ॥

स्वामिन् सर्व जगन्नाथ यावत्पूजावसानकं
तावत्व प्रीतिभावेन बिम्बेस्मिन् कलशेस्मिन्
प्रतिमायां सन्निधिं कुरु ॥

---

२३ ध्यानं

ॐ ॐ (repeat 15 times)
सूर्यं सुन्दर लोकनाथममृतं वेदान्तसारं शिवम् ।
ज्ञानं ब्रह्ममयं सुरेशममलं लोकैकचित्तं स्वयम् ॥
इन्द्रादित्य नराधिपं सुरगुरुं त्रैलोक्यचूडामणिम् ।
ब्रह्मा विष्णु शिव स्वरूप हृदयं वन्दे सदा भास्करम् ॥
(you can add more related shlokas)

---

२४ आवाहनं
( hold flowers in hand)

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वा अत्यतिष्ठद्दशाङ्गुलम् ॥

आवाहयामि देवेड्यं आश्रिताभीष्टदायिनम् ।
आदित्यमखिला राध्यं आरोग्य प्रदमच्युतम् ॥

श्री सूर्यनारायणाय नमः ।

श्री सूर्यनारायणं आवाहयामि ॥
(offer flowers to Lord)

आवाहितो भव ।स्थापितो भव ।सन्निहितो भव ।
सन्निरुद्धो भव ।अवकुण्ठिथो भव ।सुप्रीतो भव ।
सुप्रसन्नो भव ।सुमुखो भव ।वरदो भव ।
प्रसीद प्रसीद ॥
(show mudras to Lord)

---

२५ आसनं

पुरुष एवेदगं सर्वम् यद्भूतं यच्छ भव्यम् ।
उतामृतत्वस्येशानः यदन्नेनातिरोहति ॥

आसनं सङ्गृहाणेदं द्वादशात्मन् दिवाकर ।
छायानायकलोकेश मया भक्त्या समर्पितम् ॥

ॐ श्री सूर्यनारायणाय नमः ।आसनं समर्पयामि ॥
(offer flowers/akShathaas)

---

२६ पाद्यं
(offer water)

एतावानस्य महिमा अतो ज्यायागंश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥

पाद्यं ददामि भगवन् पद्मादिकुसुमैर्युतम् ।
पद्मबन्धो गृहाण त्वं प्रभाकर नमोऽस्तु ते ॥

ॐ श्री सूर्यनारायणाय नमः ।पादोयो पाद्यं समर्पयामि ॥

---

२७ अर्घ्यं
(offer water)

त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहाभवात्पुनः ।
ततो विश्वङ्व्यक्रामत् साशनानशने अभि ॥

अर्घ्यं गृह्णीष्व देवेश गन्धाक्षत फलान्वितम् ।
अघनाशक विश्वात्मन् हरिदश्व प्रसीद मे ॥

ॐ श्री सूर्यनारायणाय नमः । अर्घ्यं समर्पयामि ॥

---

२८ आचमनीयं
(offer water or akShathaa/ leave/flower)

तस्माद्विराडजायत विराजो अधि पूरुषः ।
स जातो अत्यतिच्यत पश्चाद्भूमितथो पुरः ॥

ददाम्याचमनं तुभ्यं चराचरविबोधक ।
भक्त्याहंभ भास्करायाद्य जगद् ध्वान्त विनाशिने ॥

ॐ श्री सूर्यनारायणाय नमः । आचमनीयं समर्पयामि ॥

---

२९स्नानं

यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यम् ग्रीष्म इध्मश्शरद्धविः ॥

गंगाच यमुनाश्चैव नर्मदाश्च सरस्वति ।
तापि पयोष्णि रेवच ताभ्यः स्नानार्थमाहृतम् ॥

ॐ श्री सूर्यनारायणाय नमः । मलापकर्श स्नानं समर्पयामि ॥

---

२९.१ पञ्चामृत स्नानं
२९.१.१ पयः स्नानं (milk bath)

ॐ आप्याय स्व स्वसमेतुते
विश्वतः सोमवृष्ण्यं भवावाजस्य सन्गाधे ॥

सुरभेस्तु समुत्पन्नं देवानां अपि दुर्लभम् ।
पयो ददामि देवेश स्नानार्थं प्रतिगृह्यताम् ॥

ॐ श्री सूर्यनारायणाय नमः । पयः स्नानं समर्पयामि ॥
पयः स्नानानंतर शुद्धोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२९.१.२ दधि स्नानं (curd bath)

ॐ दधिक्रावणो अकारिषं जिष्णोरश्वस्यवाजिनः ।
सुरभिनो मुखाकरत् प्राण आयुंषितारिषत् ॥

चन्द्र मण्डल संकाशं सर्व देव प्रियं हि यत् ।
दधि ददामि देवेश स्नानार्थं प्रतिगृह्यताम् ॥

ॐ श्री सूर्यनारायणाय नमः । दधि स्नानं समर्पयामि ॥
दधि स्नानानंतर शुद्धोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२९.१.३ घृत स्नानं (ghee bath)

ॐ घृतं मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतंवस्यधाम
अनुष्ठधमावह मादयस्व स्वाहाकृतं वृषभ वक्षिहव्यम् ॥

आज्यं सुरानां आहारं आज्यं यज्ञे प्रतिष्ठितम् ।
आज्यं पवित्रं परमं स्नानार्थं प्रतिगृह्यताम् ॥

ॐ श्री सूर्यनारायणाय नमः । घृत स्नानं समर्पयामि ॥
घृत स्नानानंतर शुद्धोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२९.१.४ मधु स्नानं (honey bath)

ॐ मधुवाता ऋतायथे मधुक्षरंति सिन्धवः माध्विनः संतोष्वधीः
मधुनक्ता मुथोषसो मधुमत्वार्थिवं रजः मधुद्यौ रस्तुनः पिता
मधुमान्नो वनस्पतिर्मधुमां अस्तु सूर्यः माध्वीर्गावो भवंतुनः ॥

सर्वौषधि समुत्पन्नं पीयूष सदृशं मधु ।
स्नानर्तन्ते मया दत्तं गृहाण परमेश्वर ॥

ॐ श्री सूर्यनारायणाय नमः । मधु स्नानं समर्पयामि ॥
मधु स्नानानंतर शुद्धोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२९.१.५ शर्करा स्नानं (sugar bath)

ॐ स्वादुः पवस्य दिव्याय जन्मने स्वादुदरिन्द्राय सुहवीतु नाम्ने ।
स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये मधुमा अदाभ्यः ॥

इक्षु दन्डात् समुत्पन्ना रस्यस्निग्ध तरा शुभा ।
शर्करेयं मया दत्ता स्नानार्थं प्रतिगृह्यताम् ॥

ॐ श्री सूर्यनारायणाय नमः । शर्करा स्नानं समर्पयामि ॥
शर्करा स्नानानंतर शुद्धोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२९.२ गंधोदक स्नानं (Sandlewood water bath)

ॐ गंधद्वारां दुराधर्शां नित्य पुष्पां करीषिणीम् ।
ईश्वरीं सर्व भूतानां तामि ह्योप व्हयेश्रियम् ॥

हरि चंदन संभूतं हरि प्रीतिश्च गौरवात् ।
सुरभि प्रिय गोविन्द गंध स्नानाय गृह्यताम् ॥

ॐ श्री सूर्यनारायणाय नमः ।गंधोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२९.३ अभ्यंग स्नानं (Perfumed Oil bath)

ॐ कनिक्रदज्वनुशं प्रभ्रुवान।इयर्थिर्वाचमरितेव नावम् ।
सुमङ्गलश्च शकुने भवासि मात्वा काचिदभिभाविश्व्या विदत ॥

अभ्यंगार्थं महीपाल तैलं पुष्पादि संभवम् ।
सुगंध द्रव्य संमिश्रं संगृहाण जगत्पते ॥

ॐ श्री सूर्यनारायणाय नमः ।अभ्यंग स्नानं समर्पयामि।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२९.४ अंगोद्वर्तनकं (To clean the body)

अंगोद्वर्तनकं देव कस्तूर्यादि विमिश्रितम् ।
लेपनार्थं गृहाणेदं हरिद्रा कुङ्कुमैर्युतम् ॥

ॐ श्री सूर्यनारायणाय नमः ।अंगोद्वर्तनं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२९.५ उष्णोदक स्नानं (Hot water bath)

नाना तीर्थादाहृतं च तोयमुष्णं मयाकृतम् ।
स्नानार्थं च प्रयश्चामि स्वीकुरुश्व दयानिधे ॥

ॐ श्री सूर्यनारायणाय नमः ।उष्णोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

२९.६ शुद्धोदक स्नानं (Pure water bath)
sprinkle water all around

ॐ आपोहिष्टा मयो भुवः ।तान ऊर्जे दधातन ।
महीरणाय चक्षसे ।योवः शिवतमोरसः तस्यभाजयते हनः ।
उशतीरिव मातरः ।तस्मात् अरंगमामवो ।यस्य क्षयाय जिंवध ।
आपो जन यथाचनः ॥

ॐ श्री सूर्यनारायणाय नमः ।शुद्धोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥
(after sprinkling water around throw one tulasi leaf to the north)

---

३० महा अभिषेकः
( Sound the bell pour water from kalasha)
३०.१ पुरुष सूक्त

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं विश्वतो वृत्वात्य् अतिष्ठद् दशाङ्गुलम् ॥०१ ॥

पुरुष एवेदं सर्वं यद् भूतं यच् च भव्यम् ।
उतामृतत्वस्येशानो यद् अन्नेनातिरोहति ॥०२ ॥

एतावान् अस्य महिमातो ज्यायांश् च पूरुषः ।
पादो ऽस्य विश्वा भूतानि त्रिपाद् अस्यामृतं दिवि ॥०३ ॥

त्रिपाद् ऊर्ध्व उद् ऐत् पुरुषः पादो ऽस्येहाभवत् पुनः ।
ततो विष्वङ् व्य् अक्रामत् साशनानशने अभि ॥०४ ॥

तस्माद् विराळ् अजायत विराजो अधि पूरुषः ।
स जातो अत्य् अरिच्यत पश्चाद् भूमिम् अथो पुरः ॥०५ ॥

यत् पुरुषेण हविषा देवा यज्ञम् अतन्वत ।
वसन्तो अस्यासीद् आज्यं ग्रीष्म इध्मः शरद् धविः ॥०६ ॥

तं यज्ञम् बर्हिषि प्रौक्षन् पुरुषं जातम् अग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश् च ये ॥०७ ॥

तस्माद् यज्ञात् सर्वहुतः सम्भृतम् पृषदाज्यम् ।
पशून् तांश् चक्रे वायव्यान् आरण्यान् ग्राम्याश् च ये ॥०८ ॥

तस्माद् यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे ।
छन्दांसि जज्ञिरे तस्माद् यजुस् तस्माद् अजायत ॥०९ ॥

तस्माद् अश्वा अजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे तस्मात् तस्माज् जाता अजावयः ॥१० ॥

यत् पुरुषं व्य् अदधुः कतिधा व्य् अकल्पयन् ।
मुखं किम् अस्य कौ बाहू का ऊरू पादा उच्येते ॥११ ॥

ब्राह्मणो ऽस्य मुखम् आसीद् बाहू राजन्यः कृतः ।
ऊरू तद् अस्य यद् वैश्यः पद्भ्यां शूद्रो अजायत ॥१२ ॥

चन्द्रमा मनसो जातश् चक्षोः सूर्यो अजायत ।
मुखाद् इन्द्रश् चाग्निश् च प्राणाद् वायुर् अजायत ॥१३ ॥

नाभ्या आसीद् अन्तरिक्षं शीर्ष्णो द्यौः सम् अवर्तत ।
पद्भ्याम् भूमिर् दिशः श्रोत्रात् तथा लोकाँ अकल्पयन् ॥१४ ॥

सप्तास्यासन् परिधयस् त्रिः सप्त समिधः कृताः ।
देवा यद् यज्ञं तन्वाना अबध्नन् पुरुषम् पशुम् ॥१५ ॥

यज्ञेन यज्ञम् अयजन्त देवास् तानि धर्माणि प्रथमान्य् आसन् ।
ते ह नाकम् महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥१६ ॥

ॐ श्री सूर्यनारायणाय नमः । पुरुषसूक्त स्नानं समर्पयामि । ॥

---

३०.१ श्री सूक्त

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१॥

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥२ ॥

अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥३ ॥

कांसोस्मि तां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥४ ॥

चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥५ ॥

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसानुदन्तुमायान्तरायाश्च बाह्या अलक्ष्मीः ॥६ ॥

उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन्कीर्तिमृद्धिं ददातु मे ॥७ ॥

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वां निर्णुदमे गृहात् ॥८ ॥

गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥९ ॥

मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥१० ॥

कर्दमेन प्रजाभूतामयि सम्भवकर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥११ ॥

आपः सृजन्तु स्निग्धानि चिक्लीतवसमे गृहे ।
निचदेवीं मातरं श्रियं वासय मे कुले ॥१२ ॥

आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१३ ॥

आर्द्रां यः करिणीं यष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१४ ॥

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावोदास्योऽश्वान्विन्देयं पुरुषानहम् ॥१५ ॥

यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत् ॥१६ ॥

पद्मानने पद्म ऊरू पद्माक्षी पद्मसम्भवे ।
तन्मेभजसि पद्माक्षी येन सौख्यं लभाम्यहम् ॥१७ ॥

अश्वदायी गोदायी धनदायी महाधने ।
धनं मे जुषतां देवि सर्वकामांश्च देहि मे ॥१८ ॥

पद्मानने पद्मविपद्मपत्रे पद्मप्रिये पद्मदलायताक्षि ।
विश्वप्रिये विश्वमनोनुकूले त्वत्पादपद्मं मयि संनिधत्स्व ॥१९ ॥

ॐ श्री सूर्यनारायणाय नमः । श्री सूक्त स्नानं समर्पयामि ॥

---

३०.३ विष्णु सूक्त

अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे ।
पृथिव्याः सप्त धामभिः ॥
इदं विष्णुर्विचक्रमे त्रेधा नि दधे पदम् ।
समूढ्हमस्य पांसुरे ॥
त्रीणि त्रीणि पादा विचक्रमे विष्णुर्गोपा अदाभ्यः ।
अतो धर्माणि धारयन् ॥
विष्णोः कर्माणि पश्यतयोयतो व्रतानि पस्पशे ।
इन्द्रस्य युज्यः सखा ॥
तद् विष्णोः परमम् पदं सदा पश्यन्ति सूर्यः ।
दिवीव चक्षुराततम् ॥
तद् विप्रासो विपन्यवो जागृवांसः समिन्धते ।
विष्णोर्यत् परमं पदम् ॥

देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णयो हस्ताभ्याम्
अग्नेस्तेजसा सूर्यश्च अर्चसेन्द्रस्यं अभिशिञ्चामि ॥

बलाय श्रियै यशसेन्नाध्याय अमृताभिषेको अस्तु ।

शान्तिः पुष्टिः तुष्टिः च अस्तु ॥

ॐ श्री सूर्यनारायणाय नमः ।महा अभिषेक स्नानं समर्पयामि ॥

---

३१ प्रतिष्ठापना

ॐ नमो सूर्यनारायणाय ॥ (Repeat 12 times)

ॐ तदस्तु मित्रा वरुणा तदग्ने सम्योरश्मभ्यमिदमेस्तुशस्तम् ।
अशीमहि गाडमुत प्रतिष्ठां नमो दिवे ब्रहते साधनाय ॥
ॐ ग्रिहवै प्रतिष्ठासूक्तं तत् प्रतिष्टित तमया वाचा ।
शं स्तव्यं तस्माद्यद्यपिदूर इव पशून् लभते गृहाणेवै ॥
नानाजिगमिशति ग्रिहाहि पशूनां प्रतिष्ठा प्रतिष्ठा

ॐ श्री सूर्यनारायणाय नमः।श्री सूर्यनारायणं आवाहयामि ॥
सुप्रतिष्ठमस्तु ॥

---

३२ वस्त्र

(offer two pieces of cloth for the Lord)

ॐ तं यज्ञं बर्हिषि प्रौक्षन् पुरुषं जातमग्रतः ।
तेन देवा अयजन्त साध्या ऋषयश्च ये ॥

दिव्यांबरयुगं सूक्ष्मं हेमसूत्रबिराजितम् ।
स्वीकुरुष्व जगद्बन्धो दिवाकर नमोऽस्तु ते ॥

ॐ श्री सूर्यनारायणाय नमः ।वस्त्रयुग्मं समर्पयामि ॥

---

३३ यज्ञोपवीतम्

तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यम् ।
पशूँस्तागंश्चक्रे वायव्यान् आरण्यान् ग्राम्याश्चये ॥

ब्रह्मविष्णुमहेशान वपुषे विश्वचक्षुषे ।
साक्षिणे कर्मणां तुभ्यं उपवीतं ददाम्यहम् ॥

ॐ श्री सूर्यनारायणाय नमः ।यज्ञोपवीतं समर्पयामि ॥

---

३४ आभरणं हस्त भूषणं

गृहाण नानाभरणानि सूर्यनारायणाय निर्मितानि ।
ललाट कण्ठोत्तम कर्ण हस्त नितम्ब हस्तांगुलि भूषणानि ॥

ॐ श्री सूर्यनारायणाय नमः ।आभरणानि समर्पयामि ॥
ॐ श्री सूर्यनारायणाय नमः ।हस्त भूषणं समर्पयामि ॥

---

३५ गंधम्

तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे ।
छन्दाँगसि जज्ञिरे तस्मात् यजुस्तस्मादजायत ॥

गौरोचन चंदन देवदारु कर्पूर कृष्णागरु नागराणि ।
कस्तूरिका केसर मिश्रितानि यथोचितं सत्यमयार्पितानि ॥

ॐ श्री सूर्यनारायणाय नमः ।गंधं समर्पयामि ॥

---

३६ नाना परिमल द्रव्यम्

ॐ अहिरैव भोग्येः पर्येति बाहुं जाया हेतिं परिभादमानः ।
हस्तज्ञो विश्वावयुनानि विद्वान्पुमास्प्रमांसं परिपातु विश्वतः ॥

ॐ श्री सूर्यनारायणाय नमः ।नाना परिमल द्रव्यं समर्पयामि ॥

---

३७ अक्षत

तस्मादश्वा अजायन्त ये के चो भयादतः ।
गावो ह् जज्ञिरे तस्मात् तस्माज्जाता अजावयः ॥

श्वेत तुण्डल संयुक्तान् कुंकुमेन विराजितान् ।
अक्षतान् गृह्यतां देव नारायण नमोऽस्तुते ॥

श्री सूर्यनारायणाय नमः ।अक्षतान् समर्पयामि ॥

---

३८ पुष्प

माल्यादीनि सुगन्धीनि माल्यतादीनि वैप्रभो ।
मया ह्रितानि पूजार्थं पुष्पाणि प्रतिगृह्यताम् ॥
ॐ श्री सूर्यनारायणाय नमः ।पुष्पाणि समर्पयामि ॥

तुलसी कुंदमंदार पारिजाताम्बुजैस्तथा ।
पञ्चभिर्ग्रथिता माला वैजयंति कथ्यते ॥
ॐ श्री सूर्यनारायणाय नमः ।वैजयंती माला समर्पयामि ॥

---

३९ नाना अलङ्कार

कटि सूताङ्गुली येच कुण्डले मुकुठं तथा ।
वनमालां कौस्तुभं च गृहाण पुरुषोत्तम ॥

श्री सूर्यनारायणाय नमः ।नाना अलन्कारान् समर्पयामि ॥

---

४० अथाङ्गपूजा

ॐ पावनाय नमः ।पादौ पूजामि ॥
ॐ ग्रहपतये नमः ।गुल्फौ पूजामि ॥
ॐ जगदानन्दाय नमः ।जानुनी पूजामि ॥
ॐ छायाप्रियाय नमः ।जंघे पूजामि ॥
ॐ अनूरुसारथये नमः ।ऊरून् पूजामि ॥
ॐ सवित्रे नमः ।गुह्यं पूजामि ॥
ॐ मित्राय नमः ।जघनं पूजामि ॥
ॐ त्रयीमयाय नमः ।कटिं पूजामि ॥
ॐ आकाशचारिणे नमः ।उदरं पूजामि ॥
ॐ रवये नमः ।हृदयं पूजामि ॥
ॐ सूर्याय नमः ।पार्श्वौ पूजामि ॥
ॐ जगच्चक्षुषे नमः ।पृष्ठदेहं पूजामि ॥
ॐ भानवे नमः ।स्कन्धौ पूजामि ॥
ॐ सुकपोलाश्रय नमः ।बाहून् पूजामि ॥
ॐ दिवाकराय नमः ।हस्तान् पूजामि ॥
ॐ कालात्मने नमः ।कण्ठं पूजामि ॥
ॐ सप्ताश्वाय नमः ।वदनं पूजामि ॥
ॐ खगाय नमः ।नासिकां पूजामि ॥
ॐ कर्णजनकाय नमः ।श्रोत्रे पूजामि ॥
ॐ विशालाक्षाय नमः ।नेत्राणि पूजामि ॥
ॐ हिरण्यगर्भाय नमः ।भ्रवौ पूजामि ॥
ॐ आदित्याय नमः ।भ्रूमध्यं पूजामि ॥
ॐ रश्मिमालिने नमः ।ललाटं पूजामि ॥
ॐ एकचक्ररथाय नमः । शिरः पूजामि ॥

ॐ सर्वसाक्षिणे नमः ।सर्वाङ्गाणि पूजामि ॥

---

४१ अथ पुष्प पूजा

ॐ मित्राय नमः ।करवीर पुष्पं समर्पयामि ॥
ॐ रवये नमः ।जाजी पुष्पं समर्पयामि ॥
ॐ सूर्याय नमः ।चम्पक पुष्पं समर्पयामि ॥
ॐ भानवे नमः ।वकुल पुष्पं समर्पयामि ॥
ॐ खगाय नमः ।शतपत्र पुष्पं समर्पयामि ॥
ॐ पूष्णे नमः ।कल्हार पुष्पं समर्पयामि ॥
ॐ हिरण्यगर्भाय नमः ।सेवन्तिका पुष्पं समर्पयामि ॥
ॐ मरीचये नमः ।मल्लिका पुष्पं समर्पयामि ॥
ॐ आदित्याय नमः ।इरुवंतिका पुष्पं समर्पयामि ॥
ॐ सवित्रे नमः ।गिरिकर्णिका पुष्पं समर्पयामि ॥
ॐ अर्काय नमः ।आथसी पुष्पं समर्पयामि ॥
ॐ भास्कराय नमः ।पारिजात पुष्पं समर्पयामि ॥
ॐ अरुणाय नमः ।पुन्नाग पुष्पं समर्पयामि ॥
ॐ शरण्याय नमः । कुन्द पुष्पं समर्पयामि ॥
ॐ अनन्ताय नमः ।मालति पुष्पं समर्पयामि ॥
ॐ अच्युताय नमः ।केतकी पुष्पं समर्पयामि ॥
ॐ आदिभूताय नमः । मन्दार पुष्पं समर्पयामि ॥
ॐ आदित्याय नमः ।पातली पुष्पं समर्पयामि ॥
ॐ आर्तरक्षकाय नमः ।अशोक पुष्पं समर्पयामि ॥
ॐ असमानबलाय नमः ।पूग पुष्पं समर्पयामि ॥
ॐ करुणारससिन्धवे नमः ।दाडिम पुष्पं समर्पयामि ॥
ॐ अखिलागमवेदिने नमः ।देव दारु पुष्पं समर्पयामि ॥
ॐ परमज्योतिषे नमः ।सुगन्ध राज पुष्पं समर्पयामि ॥
ॐ अखिलज्ञाय नमः ।कमल पुष्पं समर्पयामि ॥

श्री सूर्यनारायण स्वामिने नमः ।पुष्पपूजां समर्पयामि ॥

---

४२ अथ पत्र पूजा

ॐ अनन्ताय नमः ।तुलसी पत्रं समर्पयामि ॥
ॐ विश्वरूपाय नमः ।जाजी पत्रं समर्पयामि ॥
ॐ भानवे नमः ।चम्पका पत्रं समर्पयामि ॥
ॐ वन्दनीयाय नमः ।बिल्व पत्रं समर्पयामि ॥
ॐ ईशाय नमः ।धूर्वायुग्मं समर्पयामि ॥
ॐ सुप्रसन्नाय नमः ।सेवन्तिका पत्रं समर्पयामि ॥
ॐ सुशीलाय नमः ।मरुग पत्रं समर्पयामि ॥
ॐ सुवर्चसे नमः ।दवन पत्रं समर्पयामि ॥
ॐ वसुप्रदाय नमः ।करवीर पत्रं समर्पयामि ॥
ॐ वसवे नमः ।विष्णु क्रान्ति पत्रं समर्पयामि ॥
ॐ वासुदेवाय नमः ।माचि पत्रं समर्पयामि ॥
ॐ उज्ज्वलाय नमः ।मल्लिका पत्रं समर्पयामि ॥
ॐ उग्ररूपाय नमः ।इरुवन्तिक पत्रं समर्पयामि ॥
ॐ ऊर्ध्वगाय नमः ।अपामार्ग पत्रं समर्पयामि ॥
ॐ विवस्वते नमः ।पारिजात पत्रं समर्पयामि ॥
ॐ उद्यत्किरणजालाय नमः ।दाडिम पत्रं समर्पयामि ॥
ॐ हृषीकेशाय नमः ।बदरी पत्रं समर्पयामि ॥
ॐ ऊर्जस्वलाय नमः ।शामी पत्रं समर्पयामि ॥
ॐ वीराय नमः ।आम्र पत्रं समर्पयामि ॥
ॐ निर्जराय नमः ।मन्दार पत्रं समर्पयामि ॥
ॐ जयाय नमः ।वट पत्रं समर्पयामि ॥
ॐ नित्यस्तुत्याय नमः ।कमल पत्रं समर्पयामि ॥
ॐ उज्ज्वलतेजसे नमः ।वेणु पत्रं समर्पयामि ॥

श्री सूर्यनारायण स्वामिने नमः ।पत्रपूजां समर्पयामि ॥

---

४३ नाम पूजा

ॐ केशवाय नमः ।ॐ नारायणाय नमः ।
ॐ माधवाय नमः ।ॐ गोविंदाय नमः ।
ॐ विष्णवे नमः ।ॐ मधुसूदनाय नमः ।
ॐ त्रिविक्रमाय नमः ।ॐ वामनाय नमः ।
ॐ श्रीधराय नमः ।ॐ हृषीकेशाय नमः ।

ॐ पद्मनाभाय नमः । ॐ दामोदराय नमः ।
ॐ सङ्कर्षणाय नमः । ॐ वासुदेवाय नमः ।
ॐ प्रद्युम्नाय नमः । ॐ अनिरुद्धाय नमः ।
ॐ पुरुषोत्तमाय नमः । ॐ अधोक्षजाय नमः ।
ॐ नारसिंहाय नमः । ॐ अच्युताय नमः ।
ॐ जनार्दनाय नमः । ॐ उपेंद्राय नमः ।
ॐ हरये नमः । ॐ श्री कृष्णाय नमः ।
ॐ परशुरामाय नमः । ॐ रामाय नमः ।
ॐ बुद्धाय नमः । ॐ कल्किने नमः ।

ॐ श्री सूर्यनारायणाय नमः । नाम पूजां समर्पयामि ॥

---

४४ अष्टोत्तरशतनाम पूजा
Chant Dhyaan Shlokas

सूर्यं सुन्दर लोकनाथममृतं वेदान्तसारं शिवम् ।
ज्ञानं ब्रह्ममयं सुरेशममलं लोकैकचित्तं स्वयम् ॥
इन्द्रादित्य नराधिपं सुरगुरुं त्रैलोक्यचूडामणिम् ।
ब्रह्मा विष्णु शिव स्वरूप हृदयं वन्दे सदा भास्करम् ॥॥

ॐ अरुणाय नमः ।
ॐ शरण्याय नमः ।
ॐ करुणारससिन्धवे नमः ।
ॐ असमानबलाय नमः ।
ॐ आर्तरक्षकाय नमः ।
ॐ आदित्याय नमः ।
ॐ आदिभूताय नमः ।
ॐ अखिलागमवेदिने नमः ।
ॐ अच्युताय नमः ।
ॐ अखिलज्ञाय नमः ॥ १० ॥
ॐ अनन्ताय नमः ।
ॐ इनाय नमः ।
ॐ विश्वरूपाय नमः ।
ॐ इज्याय नमः ।
ॐ इन्द्राय नमः ।
ॐ भानवे नमः ।
ॐ इन्दिरामन्दिराप्ताय नमः ।
ॐ वन्दनीयाय नमः ।
ॐ ईशाय नमः ।
ॐ सुप्रसन्नाय नमः ॥ २० ॥
ॐ सुशीलाय नमः ।
ॐ सुवर्चसे नमः ।
ॐ वसुप्रदाय नमः ।
ॐ वसवे नमः ।
ॐ वासुदेवाय नमः ।
ॐ उज्ज्वलाय नमः ।
ॐ उग्ररूपाय नमः ।
ॐ ऊर्ध्वगाय नमः ।
ॐ विवस्वते नमः ।
ॐ उद्यत्किरणजालाय नमः ॥ ३० ॥
ॐ हृषीकेशाय नमः ।
ॐ ऊर्जस्वलाय नमः ।
ॐ वीराय नमः ।
ॐ निर्जराय नमः ।
ॐ जयाय नमः ।
ॐ ऊरुद्वयाभावरूपयुक्तसारथये नमः ।
ॐ ऋषिवन्द्याय नमः ।
ॐ रुग्घन्त्रे नमः ।
ॐ ऋक्षचक्रचराय नमः ।
ॐ ऋजुस्वभावचित्ताय नमः ॥ ४० ॥
ॐ नित्यस्तुत्याय नमः ।
ॐ ऋकारमातृकावर्णरूपाय नमः ।
ॐ उज्ज्वलतेजसे नमः ।
ॐ ऋक्षाधिनाथमित्राय नमः ।
ॐ पुष्कराक्षाय नमः ।
ॐ लुप्तदन्ताय नमः ।
ॐ शान्ताय नमः ।
ॐ कान्तिदाय नमः ।
ॐ घनाय नमः ।
ॐ कनत्कनकभूषाय नमः ॥ ५० ॥
ॐ खद्योताय नमः ।
ॐ लूनिताखिलदैत्याय नमः ।
ॐ सत्यानन्दस्वरूपिणे नमः ।
ॐ अपवर्गप्रदाय नमः ।
ॐ आर्तशरण्याय नमः ।
ॐ एकाकिने नमः ।
ॐ भगवते नमः ।
ॐ सृष्टिस्थित्यन्तकारिणे नमः ।
ॐ गुणात्मने नमः ।
ॐ घृणिभृते नमः ॥ ६० ॥
ॐ बृहते नमः ।
ॐ ब्रह्मणे नमः ।
ॐ ऐश्वर्यदाय नमः ।
ॐ शर्वाय नमः ।
ॐ हरिदश्वाय नमः ।
ॐ शौरये नमः ।
ॐ दशदिक्संप्रकाशाय नमः ।
ॐ भक्तवश्याय नमः ।
ॐ ओजस्कराय नमः ।
ॐ जयिने नमः ॥ ७० ॥
ॐ जगदानन्दहेतवे नमः ।
ॐ जन्ममृत्युजराव्याधिवर्जिताय नमः ।

ॐ उच्चस्थान समारूढरथस्थाय नमः ।
ॐ असुरारये नमः ।
ॐ कमनीयकराय नमः ।
ॐ अब्जवल्लभाय नमः ।
ॐ अन्तर्बहिः प्रकाशाय नमः ।
ॐ अचिन्त्याय नमः ।
ॐ आत्मरूपिणे नमः ।
ॐ अच्युताय नमः ॥ ८०॥
ॐ अमरेशाय नमः ।
ॐ परस्मै ज्योतिषे नमः ।
ॐ अहस्कराय नमः ।
ॐ रवये नमः ।
ॐ हरये नमः ।
ॐ परमात्मने नमः ।
ॐ तरुणाय नमः ।
ॐ वरेण्याय नमः ।
ॐ ग्रहाणांपतये नमः ।
ॐ भास्कराय नमः ॥ ९०॥
ॐ आदिमध्यान्तरहिताय नमः ।
ॐ सौख्यप्रदाय नमः ।
ॐ सकलजगतांपतये नमः ।
ॐ सूर्याय नमः ।
ॐ कवये नमः ।
ॐ नारायणाय नमः ।
ॐ परेशाय नमः ।
ॐ तेजोरूपाय नमः ।
ॐ श्रीं हिरण्यगर्भाय नमः ।
ॐ ह्रीं सम्पत्कराय नमः ॥ १००॥
ॐ ऐं इष्टार्थदाय नमः ।
ॐ अनुप्रसन्नाय नमः ।
ॐ श्रीमते नमः ।
ॐ श्रेयसे नमः ।
ॐ भक्तकोटिसौख्यप्रदायिने नमः ।
ॐ निखिलागमवेद्याय नमः ।
ॐ नित्यानन्दाय नमः ।
ॐ सूर्याय नमः ॥ १०८॥

ॐ छाया उषादेवी समेत श्रीसूर्यनारायण स्वामिने नमः ॥
इति अष्टोत्तर पूजां समर्पयामि ॥

---

४५ धूपं

वनस्पत्युद्भवो दिव्यो गन्धाढ्यो गन्धवुत्तमः ।
सूर्यनारायणाय महिपालो धूपोयं प्रतिगृह्यताम् ॥

यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन् ।
मुखं किमस्य कौ बाहू कावूरू पादावुच्येते ॥

ॐ श्री सूर्यनारायण स्वामिने नमः । धूपं आघ्रापयामि ॥

---

४६ दीपं

साज्यं त्रिवर्ति संयुक्तं वह्निना योजितुं मया ।
गृहाण मङ्गलं दीपं त्रैलोक्य तिमिरापहम् ॥

भक्त्या दीपं प्रयश्चामि देवाय परमात्मने ।
त्राहि मां नरकात् घोरात् दीपं ज्योतिर्नमोस्तुते ॥

ब्राह्मणोस्य मुखमासीत् बाहू राजन्यः कृतः ।
उरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥

ॐ श्री सूर्यनारायणाय नमः । दीपं दर्शयामि ॥

---

४७ नैवेद्यं

(dip finger in water and write a square and 'shrii' mark inside the square. Place naivedya on 'shrii'. ; remove lid and sprinkle water around the vessel; place in each food item one washed leaf/flower/akShatha)

ॐ नारायणाय विद्महे । वासुदेवाय धीमहि ।
तन्नो विष्णु प्रचोदयात् ॥

ॐ नमः सूर्यनारायणाय ॥
(show mudras)

निर्वीषिकरणार्थे तार्क्ष मुद्रा ।
अमृती करणार्थे धेनु मुद्रा ।
पवित्रीकरणार्थे शङ्ख मुद्रा ।
संरक्षणार्थे चक्र मुद्रा ।
विपुलमाया करणार्थे मेरु मुद्रा ।

Touch naivedya and chant 9 times 'ॐ'

ॐ सत्यंतवर्तेन परिसिञ्चामि
(sprinkle water around the naivedya)

भोः! स्वामिन् भोजनार्थं आगश्चादि विज्ञाप्य
(request Lord to come for dinner)

सौवर्णे स्थालिवैर्ये मणिगणकचिते गोघृतां

सुपक्वां भक्ष्यां भोज्यां च लेह्यानपि
सकलमहं जोष्यम्न नीधाय नाना शाकै रूपेतं
समधु दधि घृतं क्षीर पाणीय युक्तं
तांबूलं चापि विष्णु प्रतिदिवसमहं मनसे चिंतयामि ॥

अद्य तिष्ठति यत्किन्चित् कल्पितश्चापरंगृहे
पक्वान्नं च पानीयं यथोपस्कर संयुतं
यथाकालं मनुष्यार्थे मोक्ष्यमानं शरीरिभिः
तत्सर्वं विष्णुपूजास्तु प्रयतां मे जनार्दन
सुधारसं सुविफुलं आपोषणमिदं
तव गृहाण कलशानीतं यथेष्टमुप भुज्ज्यताम् ॥

ॐ नमो नारायणाय ।श्री सूर्यनारायणाय नमः ॥
अमृतोपस्तरणमसि स्वाहा ॥
(drop water from sha.nkha)

ॐ प्राणात्मने नारायणाय स्वाहा ।
ॐ अपानात्मने वासुदेवाय स्वाहा ।
ॐ व्यानात्मने सङ्कर्षणाय स्वाहा ।
ॐ उदानात्मने प्रद्युम्नाय स्वाहा ।
ॐ समानात्मने अनिरुद्धाय स्वाहा ।

ॐ नमः सूर्यनारायणाय ।

नैवेद्यं गृह्यतां देव भक्ति मे अचलां कुरुः ।
ईप्सितं मे वरं देहि इहत्र च परां गतिम् ॥

श्री सूर्यनारायण नमस्तुभ्यं महा नैवेद्यं उत्तमम् ।
संगृहाण सुरश्रेष्ठ भक्ति मुक्ति प्रदायकम् ॥

चंद्रमा मनसो जातः चक्षोः सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च प्राणाद्वायुरजायत ॥

ॐ नमो नारायणाय ।
श्री सूर्यनारायणाय नमः ।
नैवेद्यं समर्पयामि ॥

(cover face with cloth and chant गायत्री मंत्र
five times or repeat 12 times
ॐ नमः सूर्यनारायणाय )

सर्वत्र अमृतोपिधान्यमसि स्वाहा ।
ॐ श्री सूर्यनारायणाय नमः ।
उत्तरापोषणं समर्पयामि ॥

(Let flow water from sha.nkha)

---

४८ महा फलं
(put tulsi / akShathaa on a big fruit)

इदं फलं मयादेव स्थापितं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेत् जन्मनिजन्मनि ॥

ॐ श्री सूर्यनारायणाय नमः ।महाफलं समर्पयामि ।

---

४९ फलाष्टक
(put tulsi/akshata on fruits)

कूष्मान्ड मातुलिङ्गं च कर्कठी दाडिमी फलम् ।
रम्बा फलं जम्बीरं बदरं तथा ॥

ॐ श्री सूर्यनारायणाय नमः ।फलाष्टकं समर्पयामि ॥

---

५० करोद्वर्तनम्

करोद्वर्तन्कं देवमया दत्तं हि भक्तितः ।
चारु चंद्र प्रभां दिव्यं गृहाण जगदीश्वर ॥

ॐ श्री सूर्यनारायणाय नमः ।
करोद्वर्तनार्थे चंदनं समर्पयामि ॥

---

५१ तांबूलं

पूगिफलं सतांबूलं नागवल्लि दलैर्युतम् ।
ताम्बूलं गृह्यतां देव येल लवङ्ग संयुक्तम् ॥

ॐ श्री सूर्यनारायणाय नमः ।पूगिफल ताम्बूलं समर्पयामि ॥

---

५२ दक्षिणा

हिरण्य गर्भ गर्भस्थ हेमबीज विभावसोः ।
अनंत पुण्य फलदा अथः शांतिं प्रयश्च मे ॥

ॐ श्री सूर्यनारायणाय नमः ।सुवर्ण पुष्प दक्षिणां समर्पयामि ॥

---

५३ महा नीराजन

श्रीयै जातः श्रिय अनिरियाय श्रियं वयो जरित्रभ्यो ददाति
श्रियं वसाना अमृतत्त्व मायन् भवंति सत्या समिधा मितद्रौ
श्रिय येवैनं तत् श्रिया मादधाति संतत मृचा वषट्कृत्यं
संततमै संधीयते प्रजया पशुभिः ययेवं वेद ॥

ॐ श्री सूर्यनारायणाय नमः ।महानीराजनं दीपं समर्पयामि ॥

५४ कर्पूर दीप

अर्चत प्रार्चत प्रिय मेघा सो अर्चत ।
अर्चन्तु पुत्र का उत् उर न धृष्ण वर्चत ॥

कर्पूरकं महाराज रंभोद्भूतं च दीपकम् ।
मङ्गलार्थं महीपाल सङ्गृहाण जगत्पते ॥

ॐ श्री सूर्यनारायणाय नमः ।कर्पूर दीपं समर्पयामि ॥

५५ प्रदक्षिणा

नाभ्या आसीदन्तरिक्षम् शीर्ष्णो द्यौः समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकांग अकल्पयन् ॥

यानि कानि च पापानि जन्मांतर कृतानि च ।
तानि तानि विनश्यन्ति प्रदक्षिणे पदे पदे ॥

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात् कारुण्य भावेन रक्ष रक्ष रमापते ॥

श्री सूर्यनारायणाय नमः ।प्रदक्षिणान् समर्पयामि ॥

५६ नमस्कार

सप्तास्यासन् परिधयः त्रिस्सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वानाः अबध्नन्पुरुषं पशुम् ॥

नमः सर्व हितार्थाय जगदाधार हेतवे ।
साष्टाङ्गोयं प्रणामस्ते प्रयत्नेन मया कृतः ॥
ऊरुसा शिरसा दृष्ट्वा मनसा वाचसा तथा ।
पद्भ्यां कराभ्यां जानुभ्यां प्रणामोष्टाङ्गं उच्यते ॥

शाठ्येनापि नमस्कारान् कुर्वतः शार्ङ्ग पाणये ।
शत जन्मार्चितं पापं तत्क्षणतेव नश्यति ॥

श्री सूर्यनारायणाय नमः ।नमस्कारान् समर्पयामि ॥

५७ राजोपचार

गृहाण परमेशान सरत्ने छत्र चामरे ।
दर्पणं व्यञ्जनं चैव राजभोगाय यत्नथः ॥

श्री सूर्यनारायणाय नमः ।छत्रं समर्पयामि ॥
श्री सूर्यनारायणाय नमः ।चामरं समर्पयामि ॥
श्री सूर्यनारायणाय नमः ।गीतं समर्पयामि ॥
श्री सूर्यनारायणाय नमः ।नृत्यं समर्पयामि ॥
श्री सूर्यनारायणाय नमः ।वाद्यं समर्पयामि ॥
श्री सूर्यनारायणाय नमः ।दर्पणं समर्पयामि ॥
श्री सूर्यनारायणाय नमः ।व्यञ्जनं समर्पयामि ॥
श्री सूर्यनारायणाय नमः ।आन्दोलनं समर्पयामि ॥
श्री सूर्यनारायणाय नमः ।राजोपचारान् समर्पयामि ॥
श्री सूर्यनारायणाय नमः ।सर्वोपचारान् समर्पयामि ॥
श्री सूर्यनारायणाय नमः ।समस्त राजोपचारर्थे अक्षतान् समर्पयामि ॥

५८ मंत्र पुष्प

यज्ञेन यज्ञमयजन्त देवाः तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्ते यत्र पूर्वे साध्याः सन्ति देवाः ॥

यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत् ॥

विद्या बुद्धि धनैश्वर्य पुत्र पौत्रादि संपदः ।
पुष्पांजलि प्रदानेन देहिमे ईप्सितं वरम् ॥

नमोऽस्त्वनंताय सहस्र मूर्तये सहस्र पादाक्षि शिरोरु बाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्र कोटी युगधारिणे नमः ॥

ॐ नमो महद्भ्यो नमो अर्भकेभ्यो नमो युवभ्यो नमो आसीनेभ्यः ।
यजां देवान्य दिशक्रवा ममा जायसः शं समावृक्षिदेव ॥
ॐ ममत्तुनः परिज्ञावसरः ममत्तु वातो अपां व्रशन्वान् ।
शिशीतमिन्द्रा पर्वता युवन्नस्थन्नो विश्वेवरिवस्यन्तु देवाः ॥
ॐ कथात अग्ने शुचीयंत अयोर्ददाशुर्वाजे भिराशुशानः ।
उभेयत्तोकेतनये दधाना ऋतस्य सामनृणयंत देवाः ॥

ॐ राजाधि राजाय प्रसह्य साहिने नमो वयं वैश्रवणाय
कूर्महे समे कामान् काम कामाय मह्यं कामेश्वरो
वैश्रवणो दधातु कुबेराय वैश्रवणाय महाराजाय नमः ॥

ॐ स्वस्ति साम्राज्यं भोज्यं स्वाराज्यं वैराज्यं
पारमेष्ठां राज्यं महाराज्यमाधिपत्यमयं समंत
पर्यायिस्यात् सार्व भौमः सार्वायुशः अंतादा
परार्धात् पृथिव्यै समुद्र पर्यन्ताय एकरालिति तदप्येश
श्लोकोभिगीतो मरूतः परिवेष्टारो मरुतस्या वसन्गृहे
आवीक्षितस्य कामप्रेर्विश्वेदेवा सभासद इति ॥

श्री सूर्यनारायणाय नमः ।मंत्रपुष्पं समर्पयामि ॥

५९ शङ्ख ब्रमण

(make three rounds of sha.nkha with water like aarati and pour down;
chant OM 9 times and show mudras)

इमां आपशिवतम इमं सर्वस्य भेषजे ।
इमां राष्ट्रस्य वर्धिनि इमां राष्ट्र भ्रतोमत ॥

---

६० तीर्थ प्राश्न

अकाल मृत्यु हरणं सर्व व्याधि निवारणं ।
सर्व पाप उपशमनं विष्णु पादोदकं शुभम् ॥

---

६१ विसर्जन पूजा

आराधितानां देवतानां पुनः पूजाम् करिष्ये ॥
श्री सूर्यनारायण स्वामि देवताभ्यो नमः ॥

पुनः पूजा

सूर्यं सुन्दर लोकनाथममृतं वेदान्तसारं शिवम् ।
ज्ञानं ब्रह्ममयं सुरेशममलं लोकैकचित्तं स्वयम् ॥
इन्द्रादित्य नराधिपं सुरगुरुं त्रैलोक्यचूडामणिम् ।
ब्रह्मा विष्णु शिव स्वरूप हृदयं वन्दे सदा भास्करम् ॥

ॐ श्री सूर्यनारायणाय नमः । ध्यायामि । ध्यानं समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । आवाहयामि ।
ॐ श्री सूर्यनारायणाय नमः । आसनं समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । पाद्यं समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । अर्घ्यं समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । आचमनीयं समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । पन्चामृत स्नानं समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । मह अभिषेकं समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । वस्त्रयुग्मं समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । यज्ञोपवीतं समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । गन्धं समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । नान परिमल द्रव्यं समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । हस्तभूषणं समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । अक्षतान् समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । पुष्पं समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । नाना अलंकारं समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । अंग पूजां समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । पुश्प पूजां समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । पत्र पूजां समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । आवरण पूजां समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । अष्टोत्तर पूजां समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । धूपं आघ्रापयामि
ॐ श्री सूर्यनारायणाय नमः । दीपं दर्शयामि
ॐ श्री सूर्यनारायणाय नमः । नैवेद्यं समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । महा फलं समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । फलाश्स्टकं समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । करोद्वर्थनकं समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । ताम्बूलं समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । दक्षिणां समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । महा नीराजनं समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । कर्पूर दीपं समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । प्रदक्षिणां समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । नमस्कारान् समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । राजोपचारं समर्पयामि ।
ॐ श्री सूर्यनारायणाय नमः । मन्त्रपुष्पं समर्पयामि ।

पूजांते छत्रं समर्पयामि । चामरं समर्पयामि ।
नृत्यं समर्पयामि । गीतं समर्पयामि ।
वाद्यं समर्पयामि । आंदोलिक आरोहणं समर्पयामि ।
अश्वारोहणम् समर्पयामि । गजारोहणं समर्पयामि ।

श्री सूर्यनारायण स्वामी देवताभ्यो नमः ।

समस्त राजोपचार देवोपचार शक्त्युपचार भक्त्युपचार
पूजां समर्पयामि ॥

---

६७ आत्म समर्पण

यस्य स्मृत्या च नाम्नोक्त्या तपः पूजा क्रियादिशु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तं अच्युतम् ॥

मंत्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन ।
यत्पूजितं मयादेव परिपूर्णं तदस्तु मे ॥

अनेन मया कृतेन श्री सूर्यनारायण देवता
सुप्रीता सुप्रसन्ना वरदा भवतु ।

मध्ये मन्त्र तन्त्र स्वर वर्ण न्युनातिरिक्त लोप दोष
प्रायश्चित्तार्थं अच्युतानन्तगोविंद नामत्रय
महा मन्त्र जपं करिष्ये ॥

ॐ अच्युताय नमः । ॐ अनंताय नमः । ॐ गोविंदाय नमः
ॐ अच्युताय नमः । ॐ अनंताय नमः । ॐ गोविंदाय नमः
ॐ अच्युताय नमः । ॐ अनंताय नमः । ॐ गोविंदाय नमः
अच्युतानंतगोविन्देभ्यो नमः ।

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत् सकलं परस्मै नारायणेति समर्पयामि ॥

नमस्मरोमि ।
श्री सूर्यनारायण स्वामी देवता प्रसादं शिरसा गृह्णामि ॥

---

६८ क्षमापनं

अपराध सहस्राणि क्रियन्ते अहर्निशं मया ।
तानि सर्वाणि मे देव क्षमस्व पुरुषोत्तम ॥

यान्तु देव गण सर्वे पूजां आदाय पर्तिवीम्
इष्ट काम्यार्थ सिध्यर्थं पुनरागमनाय च ॥

(Shake the kalasha)

## ॥ श्री कृष्णार्पणमस्तु ॥

---

Text by Sri S. A. Bhandarkar (achkumg3@batelco.com.bh); Modified for ITRANS;
Proof Reading by Saroja Sundaresan (intersid@batelco.com.bh)
Last updated on February 23, 1998; Send corrections to Sowmya Ramkumar (ramkumar@batelco.com.bh)